७५,१९ "अरणोऽरममाणः" इति भा० । ४दुःखिते "मा भूम निष्ट्या इवेन्द्र ! अरणा इव" ऋ०८,१,१३, "अरणा अरममाणाः दुःखिनः" भा०।

**अरणि** पु० ऋ–अनि । १सूर्य्ये 'गणियारीति' ख्याते २वृक्षे । ऋच्छति प्रापयत्यग्निम् । ३अग्निमन्थनकाष्ठे द्वि० । स्त्रियां ङीप् । "जाते पुत्रेऽरणिं मथित्वेति" श्रुतिः "आत्मानमरणिं कृत्वा" पुरा० "अग्न्याधानशब्दे ६३पृष्ठे विवरणम् "अरणीसहितं मन्थं ब्राह्मणस्य तपस्विनः । मृगस्य घर्षमाणस्य विषाणे समसज्जत" भा०व०प० । "ततः पुनर्महात्मानः पाणिं वेनस्य दक्षिणम् । अरणीमिव संरब्धा ममन्थुर्जातमन्यव" इति हरिवं० । "पराशरकुलोद्भूतः शुकोनाम महातपाः । भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः । व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन्" हरिवं० । अरणीमधिकृत्य कृतोग्रन्थः ढक् । आरणेयम् भारतवनपर्व्वान्तर्गते अरणीहरणाधिकारेण व्यासकृतेऽवान्तरपर्वभेदे ।

**अरणिक** पु० अरणये अग्निमन्थनकाष्ठाय साधु ठन् । अग्निमन्थनकाष्ठसाधने अग्निमन्थनवृक्षे ।

**अरणीकेतु** पु० अरणी केतुरस्य । अग्निमन्थनवृक्षे राजनि० ।

**अरणीसुत** पु० ६त० । शुकदेवे "स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः" । अरणीसहितं गृह्य ममन्थाग्निचिकीर्षया । अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा । घृताचीन्नामाप्सरसमपश्यद्भगवानृषिः । ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः । अभवद्भगवान् व्यासो वने तस्मिन् युधिष्ठिर ! । सा च दृष्ट्वा तदा व्यासं कामसंविग्नमानसम् । शुकीभूत्वा महाराज ! घृताची समुपागमत् । स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृताम् । शरीरजेनानुगतः सर्व्वगात्रातिगेन ह । स तु धैर्य्येण महता निगृह्णन् हृच्छयं मुनिः । न शशाक नियन्तुन्तत् व्यासः प्रविसृतं मनः । भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः । यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया । अरण्यामेव सहसा तस्य शुक्रमवापतत् । सोऽविशङ्केन मनसा तथैव द्विज सत्तमः । अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृपः । शुक्रे निर्मथ्यमाने स शुको जज्ञे महातपाः । परमर्षिर्महायोगी अरणीगर्भसम्भवः । यथाऽध्वरे समिद्धोऽग्निर्भाति हव्यमुदावहन् । तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा" भा०शा०प० ।

**अरण्य** पु०न० अर्य्यते शेषे वयसत्र ऋ–अन्य । १वने, अटव्यादि । "माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्" चाणक्यः । "सावित्रीमप्यधीयीत गत्वारण्यं समाहितः । गृहे गुरौ वारण्ये वा निवसन्नात्मवान् द्विजः" मनुः । "गृहस्थस्तु यदा पश्येद्बलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्" मनुना अन्त्ये वयस्येव अरण्यवासविधानात्तस्य तथात्वम् । स्वार्थे कन् तत्रैव । "य एनमेव विन्दन्ति ये चारण्यकमाश्रिताः" या०स्मृ० । २कट्फलवृक्षे पु० । उत्करादि०चतुरर्थ्यां छ । अरण्यीयः अरण्यसन्निकृष्टदेशादौ त्रि० । अरण्येऽध्येयः वुञ् । आरण्यकं वनपाठ्ये अनुवाकभेदे "आरण्यकमधीत्य च" मनुः । अरण्यमधिकृत्य कृतः ग्रन्थः आरण्यम् रामायणान्तर्गतारण्यकाण्डे ।

**अरण्यकदली** स्त्री अरण्यस्यैव कदली । गिरिकदल्यां तस्या ग्रामादावनुत्पत्तेस्तथात्वम् । [ग्रन्थभेदे ।

**अरण्यकाण्ड** न० रामायणान्तर्गते रामस्य वनगमनवर्णनात्मके

**अरण्यकार्पासी** स्त्री अरण्ये कार्पासी । (वनकापास) इति ख्यातायां वनकार्पास्याम् ।

**अरण्यकुलत्थिका** स्त्री अरण्यस्य कुलत्थिका । (वनकुलथीति) ख्यातायाम् वनकुलत्थिकायाम् ।

**अरण्यकुसुम्भ** पु० ६त० । वनकुसुम्भे ।

**अरण्यगज** पु० अरण्यस्थो गजः । दुर्दान्तगजे ।

**अरण्यगान** न० अरण्ये गीयते कर्म्मणि ल्युट् । सामवेदान्तर्गते अरण्ये गेये गानभेदे । [भेदे राजनि० ।

**अरण्यघोली** स्त्री अरण्यजा घोली । वनघोल्यां पत्रशाक-

**अरण्यचटक** पु० ६त० । वनचटके ।

**अरण्यचन्द्रिका** अरण्ये चन्द्रिकेव निष्फला द्रष्टुरभावात् । निष्फलभूषणे । लोके हि चन्द्रिका उन्मीलितनेत्रपङ्क्तिभिरालोक्यते अरण्ये तु लोकाभावेन दर्शकाभावात् दर्शनेन प्रीतिजनिका न भवतीति तस्याः यथा निष्फला शोभा एवमन्यस्यापि तथा, अतएव "स्त्रीणां प्रियालोकफलो हि वेशः" इति कुमा० व्याख्यायां मल्लिनाथेन "अन्यथा अरण्यचन्द्रिका स्यादित्युक्तम्" ।

**अरण्य(ण्ये)चर** त्रि० अरण्ये चरति चर–ट ७त० वा अलुक्स० । वनचरे व्याधादौ ।

**अरण्यज** त्रि० अरण्ये जायते जन–ड उप०स० । वनजाते ।

**अरण्यजार्द्रक** न० अरण्ये जायते जन–ड कर्म्म० । (वन आदा) इति ख्याते वनार्द्रके ।